केवल अभ्यास हेतु नमूना प्रश्न पत्र

हाई स्कूल परीक्षा - 2026-2027

विषय - संस्कृत

कक्षा - 10 वीं

Total Question	Total Printed Pages	Time	Maximum Marks
23	06	घण्टात्रयम्	पूर्णाङ्काः - 75

निर्देशाः-

1. सर्वे प्रश्नाः अनिवार्याः सन्ति।

2. प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।

1. उचित विकल्पं चित्वा लिखत - **1 × 6 =6**

I "छात्रः" इत्यस्मिन् पदे वचनम् अस्ति -

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

II "पितरम् " इत्यस्मिन् पदे विभक्तिः अस्ति -

(अ) प्रथमा विभक्तिः (ब) द्वितीया विभक्तिः

(स) चतुर्थी विभक्तिः (द) षष्ठी विभक्तिः

III "कवि" शब्दस्य सप्तमी विभक्तेः रुपम् अस्ति -

(अ) कविम् (ब) कविभिः

(स) कविषु (द) कवेः

IV "मम" पदे विभक्तिः अस्ति -

(अ) षष्ठी विभक्तिः (ब) पञ्चमी विभक्तिः

(स) तृतीया विभक्तिः (द) चतुर्थी विभक्तिः

V अधोलिखितेषु शब्देषु अव्ययं पदं नास्ति -

(अ) अत्र (ब) यत्र

(स) पत्र (द) सर्वत्र

VI "सदाचारः एव परमो धर्मः" अस्मिन् वाक्ये अव्ययम् अस्ति -

(अ) परमो (ब) एव

(स) धर्मः (द) सदाचारः

2. शुद्धवाक्यानां समक्षम्"आम्" अशुद्धवाक्यानां समक्षं "न" इति लिखत - **1 × 6 = 6**

I "पठिष्यन्ति" इत्यस्मिन् पदे लट्लकारः अस्ति ।

II "पचानि" इत्यस्मिन् पदे उत्तमपुरुषः अस्ति ।

III "गच्छति" इत्यस्मिन् पदे एकवचनम् अस्ति ।

IV "निरपराधः" इत्यस्मिन् पदे निस् उपसर्गः अस्ति ।

V "संस्कृतः" इत्यस्मिन् पदे सम् उपसर्गः अस्ति ।

VI "भवेत्" इत्यस्मिन् पदे लोट्लकारः अस्ति ।

3. युग्ममेलनं कुरुत - **1 × 6 = 6**

(अ)	(ब)
1. प्रतिदिनम्	(I) विसर्गसन्धिः
2. चन्द्रशेखरः	(II) दीर्घसन्धिः
3. योजकस्तत्र	(III) अव्ययीभावसमासः
4. भोजनान्ते	(IV) बहुब्रीहिसमासः
5. रामलक्ष्मणौ	(V) नोत्थितः
6. न+उत्थितः	(VI) द्वन्द्वसमासः

4. एकपदेन उत्तरं लिखत - **1 × 6 = 6**

I कस्य शोभा एकेन राजहंसेन भवति ?

II व्याघ्रः कस्मात् बिभेति ?

III वृषभः कुत्र पपात ?

IV "खादित्वा" इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

V "गतवान्" इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

VI "बाला" इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?

5. प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत - **1 × 6 = 6**

(वृषभम् , रसालम् , विपन्नम् , मानवाय , सत्वरम् , अक्षरम्)

I "आम्रम्" इत्यस्य पदस्य .... पर्यायपदं भवति ।

II "सम्पन्नम्" इत्यस्य पदस्य .... विलोमपदं भवति ।

III "दानवाय" इत्यस्य पदस्य .... विलोमपदं भवति ।

IV "दुर्बलम् वृषभम्" इत्यस्मिन् पदयोः ....विशेष्यपदम् अस्ति ।

V "अमन्त्रम् अक्षरम्" इत्यस्मिन् पदयोः ....विशेषणपदम् अस्ति ।

VI "शीघ्रम्" इत्यस्य पदस्य .... पर्यायपदं भवति ।

(प्रश्न क्रमांक 6 तः 10 पर्यन्तं प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत)

6. कविः कुत्र सञ्चरणं कर्तुम् इच्छति ? 2

7. लोके महतो भयात् कः मुच्यते ? 2

8. माता सुरभिः किमर्थम् अश्रूणि मुञ्चति स्म ? 2

9. केन समः बन्धुः नास्ति ? 2

10. अस्माकं पर्यावरणे किं किं दूषितम् अस्ति ? 2

11. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य पुस्तकस्य एकं सुभाषितं लिखत । 2

12. अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत - **1/2 × 4=2**

(क) रे रे धूर्त त्वया मह्यं पुरा व्याघ्रत्रयं दत्तम्।

(ख) अस्ति देउलाख्यो ग्रामः ।

(ग) मार्गे सा एकं व्याघ्रं अपश्यत् ।

(घ) तत्र राजसिंहो नाम राजपुत्रः वसति स्म।

13. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - **1/2 × 4=2**

(क) उद्याने <u>पक्षिणां</u> कलरवं चेतः प्रसादयति ।

(ख) <u>महानगरेषु</u> वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति ।

(ग) बुद्धिमती <u>चपेटया</u> पुत्रौ प्रहृतवति ।

(घ) <u>व्याघ्रं</u> दृष्टवा धूर्तः श्रृगालः अवदत् ।

14. अधोलिखितानि वाक्यानि कः कं प्रति कथयति - **1 × 2=2**

	कः	कं प्रति
(क) नृत्यातिरिक्तं का तव विशेषता ?	....	....
(ख) वयस्य! अपूर्वं खलु नामधेयम् ।	....	....

15. अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः - **1 × 2=2**

(क) ईश्वरं नमः ।

(ख) बालकः मोदकं खादामि ।

16. रिक्तस्थानानि पूरयत - **1/2 × 4=2**

(क) समग्रं भारतम् उल्लासे .... आसीत् ।

(ख) भूकम्पविभीषिका .... जनपदं विनष्टं कृतवती ।

(ग) धैर्यवान् .... परिभवं न प्राप्नोति ।

(घ) प्राणेभ्योऽपि .... रक्षणीयः ।

17. वाच्यपरिवर्तनं कुरुत - **1 × 2=2**

(क) पशुः उदीरितम् अर्थं गृह्णाति। (कर्मवाच्ये)

(ख) गायकेन गीतं गीयते। (कर्तृवाच्ये)

18. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - **3**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।

तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः

चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं तदानीमेव किञ्चिद् विचित्रमघटत।

प्रश्नाः -

(क) चौरः कुत्र प्रविष्टः ?

(ख) अतिथि केन प्रबुद्धः ?

(ग) चौरः कासाम् आदाय पलायितः ?

अथवा

भूकम्पेन निहन्यन्ते च विवशाः प्राणिनः। ज्वालामुद्गिरन्त एते पर्वता भीषणं भूकम्पं जनयन्ति। यद्यपि दैवः प्रकोपो भूकम्पो नाम, तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते ।

प्रश्नाः -

(क) कस्य उपशमनस्य स्थिरोपायः नास्ति ?

(ख) कीदृशाः प्राणिनः भूकम्पेन निहन्यन्ते ?

(ग) पर्वता अपि किं जनयन्ति ?

19. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - **3**

एक एव खगो मानी वने वसति चातकः ।

पिपासितो वा म्रियते याचते वा पुरन्दरम् ।।

प्रश्नाः -

(क) कः पिपासितः म्रियते ?

(ख) चातकः कं याचते ?

(ग) चातकः कुत्र वसति ?

अथवा

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।

पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।

प्रश्नाः -

(क) पिता पुत्राय बाल्ये किं यच्छति ?

(ख) पिताऽस्य किं तपस्तेपे इत्युक्तिः का ?

(ग) पिता कस्मै बाल्ये विद्याधनं यच्छति ?

20. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - **3**

मयूरः - अरे वानरः! तूष्णीं भव। कथं त्वं योग्यः वनराजपदाय ? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः, अतः वने निवसन्तं मां वनराजरूपेणापि दृष्टुं सज्जाः भवन्तु अधुना । यतः कथं कोऽप्यन्यः विधातुः निर्णयम् अन्यथाकर्तुं क्षमः।

काकः - (सव्यङ्ग्यम्) अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।

मयूरः - यतः मम नृत्यं तु प्रकृते आराधना। पश्य! पश्य! मम पिच्छानामपूर्वं सौंदर्यं (पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः। वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अतः अहमेव योग्यः वनराजपदाय।

प्रश्नाः -

(क) मयूरं केन एव पक्षिराजः वनराजः वा कृतः ?

(ख) नृत्यातिरिक्तं का तव विशेषता इति कः कथयति ?

(ग) मयूरः कथं नृत्यमुद्रायां स्थितः भवति ?

अथवा

विदूषकः - (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?

लवः - तस्याः द्वे नाम्नी।

विदूषकः - कथमिव ?

लवः - तपोवनवासिनो देवीति नाम्नाहवयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः - अपि च इतस्तावद् वयस्य ! मुहूर्तमात्रम्।

प्रश्नाः -

(क) तस्याः कति नाम्नी ?

(ख) के देवी इति नाम्नाहवयन्ति?

(ग) कुशलवयोः मातरं वाल्मीकिः केन नाम्ना आहवयति ?

21. अधोलिखितमपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-(केऽपि चत्वारः) **4**

स्वस्थ शरीरे एव स्वस्था बुद्धिः वसति। स्वस्था बुद्धि एव स्वस्थविचाराणां जननी अस्ति। व्यायामशीलाः मनुष्यः एव नीरोगः चिरंजीवी च भवति। व्यायांशीलाः मनुष्याः प्रायेण रुग्णाः न भवन्ति। विविधरोगाणां चिकित्सा अपि व्यायामेन सम्भवति। अतः जीवनस्य कृते व्यायामः परमावश्यकः।

प्रश्नाः -

(क) अस्य गद्यांशस्य उचितं शीर्षकं लिखत ?

(ख) कःजीवनस्य कृते परमावश्यकः ?

(ग) स्वस्था बुद्धिः कुत्र वसति ?

(घ) कः एव नीरोगः भवति ?

(ङ) केषाम् चिकित्सा अपि व्यायामेन सम्भवति ?

22. स्वविवाहे आमन्त्रयितुं स्वमित्रं प्रति पत्रं लिखत । **4**

अथवा

स्वप्राचार्यस्य कृते स्थानान्तरणप्रमाणपत्रार्थे एकम् आवेदनपत्रं लिखत ।

23. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु निबन्धं लिखत - **4**

(क) मम प्रिय कविः,

(ख) आचारस्य महत्त्वम्,

(ग) अस्माकं देशः,

(घ) देववाण्याः महत्त्वम् ।

---XXX---